CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

5 9 P B
Coll. No. 432

Title Daśa pāpahara stotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 432 Subject : Stotra.

Title : Daśa pāpahara stotra

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 5.2" by 4.3' Extent : 7 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : ———

॥श्रीसरस्वत्यैनमः॥ ॥ॐचतुर्भुजांत्रिनेत्रां
चसर्वावयवशोभितां॥रत्नकुंडलसितांभो
जवरदाभयसत्करां॥१॥ सितवस्त्रपरी
धानांमुक्तामणिविभूषितां॥एवंध्याये।
ससौम्यांचचंद्रायुतसमप्रभां॥२॥चाम
रैःवीज्यमानांचश्वेतछत्रोपशोभितां
॥सुप्रसन्नांचवरदांकरुणार्द्रनिरंतरां॥
॥३॥सुधाप्लावितभूपृष्ठांदिव्यगंधानुले
पनां॥त्रैलोक्यनमितांगंगांसर्वैर्दे १
वैरधिष्ठितां॥४॥दिव्यरत्नविभूषांचदिव्य

माल्यविभूषितां॥ध्यात्वाजलेयथाप्रोक्तं
तथार्चयांचपूजयेत्॥५॥ ॥ॐनमोभग
वतीऐंह्रींहिलिहिलिमिलिमिलिगंगे
मांपावयपावयस्वाहा॥अनेनमंत्रेणग
मोक्तेनपंचपुष्पांजलिंतुश्रीगंगायैनिवे
दयेत्॥६॥मयाकृतानिपुष्पाणिपूजार्थं
प्रतिगृह्यतां॥दशांगंगुग्गलंधूपंसुगंधंच
मनोहरं॥७॥गृहाणमंगलेदीपंघृतवर्त्ती
समन्वितं॥रूद्ररूपेनमस्तेस्तुगृहाणवर
दाभव॥८॥परदारपरद्रव्यपरद्रोहपराङ्मु

रवः॥ गंगाब्रूते कदागत्य मामयं पावयिष्य
ति॥१०॥ इति श्री वैश्वानरस्नैं नारदसंवादे
दशविधिपापहरायाः श्रीगंगायाध्यानार्च
नविधि॥ एवं ध्यानार्चन विधाय॥११॥ प
श्चाज्जलांतरे स्थितः ज्येष्ठे मासि सितेप
क्षे प्रतिपदादि दशमीपर्यंतं दशविधपाप
प्रणाशार्थं प्रतिदिनमुत्तरोत्तरं दिनवृध्या
स्तोत्रपाठमहं करिष्ये॥११॥ ॥ब्रह्मोवाच
॥नमः शिवायै गंगायै शिवदायै नमो नम २
॥नमस्ते विष्णुरूपिण्यै [illegible]

ब्रह्ममूर्त्यै नमोस्तु ते॥१२॥ नमस्ते रुद्र
रूपिण्यै शांकर्यै ते नमो नमः॥ सर्वदेवस्व
रूपिण्यै नमो भेषजमूर्त्तये॥१३॥ सर्वस्य
सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोस्तु ते॥
स्थास्नुजंगमसंभूतविषहंत्र्यै नमो नमः
॥१४॥ संसारविषनाशिन्यै जीवदायै न
मो नमः॥ तापत्रितयसंहंत्र्यै प्राणेश्यैः सहि
नमो तैनमोः॥१५॥ शांतिसंतानकारिण्यै नम
स्ते शुद्धमूर्त्तये॥ सर्वसंशुद्धिकारिण्यै नमः
पापारिमूर्त्तये॥१६॥ भुक्तिमुक्तिप्रदायिन्यै

नन्दायैनमोनमः॥गोगोपगोगदा
यिन्यैगोगवत्यैनमोनमः॥१७॥चित्रिकूता
ज्ञानसंस्थायैतेजोवत्यैनमोस्तुते॥मंदा स्तुते
किन्यैनमस्तेस्तुस्वर्गपीयूषदैनमोनमः॥१८
॥नमस्त्रैलोक्यनृपायैत्रिपथायैनमोन
मः॥नमस्त्रिशूलसंस्थायैसमवत्यै
नमोनमः॥१९॥नंदायैलिंगधारिण्यैना
रायिण्यैनमोस्तुते॥नमस्तेविश्वमित्रा
यैरेवत्यैतेनमोनमः॥२०॥हस्त्यैतेनम ३
स्तेस्तुलोकधात्र्यैनमोनमः॥पृथिवीशि

शांतायैवरिष्ठायैवरदायैनमोस्तुते॥प्राणि
कुंडलायैसुषुम्णायैचतेजीवन्यैनमोन
मः॥२३॥
वामृतायैवसुरूपायैनमोनमः॥२१॥परा
परसतत्त्वायैतारायैतेनमोनमः॥पाशज
न्निकृन्तन्यैःअभिमान्यैनमोनमः॥२२॥ब्रु
सिण्यैब्रह्मदायैदुरतघ्न्यैनमोस्तुते॥ग्र
णितार्त्तित्रन्त्यैजगन्मात्रेनमोनमः॥
२३॥सर्वापत्तिपस्तायैमंगलायैनमो
नमः॥२४॥शरणागतदीनार्त्तायपरित्राणपरा
यणे॥२५॥सर्वस्यार्त्तिहरेदेवीनारायणि
नमोस्तुते॥निर्लेपायैदुर्गहन्त्र्यैदक्षायैते
नमोनमः॥२६॥परापरपरेतुभ्यंनमस्तेमि

ह्रदे सदा ॥ गंगे ममाग्रतो भूया गंगे मे देवि
पृष्ठतः ॥२७॥ गंगे मे पार्श्वयोरेधि त्वयि गंगे
स्तु मे स्थितिः ॥ आदौ त्वमंते मध्ये च सर्वं त्वं गां
गते शिवे ॥२८॥ त्वमेव मूलप्रकृतिस्त्वं हि
नारायणः परः ॥ गंगे त्वं परमात्मा च शिव
स्तुभ्यं नमः शिवे ॥२९॥ य इदं पठति स्तो
त्रं शृणुयान्नित्यं नरोत्तमः ॥ शृणोति श्रद्धया
युक्तो कायवाक्चित्तसंभवैः ॥३०॥ दशधा
संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ रोगस्थो ४
मुच्यते रोगात्तापेभ्यश्च प्रमुच्यते । विपद्भ्यो

बंधनाच्चैव भयेभ्यश्च प्रमुच्यते ॥ सर्वान्का
मानवाप्नोति प्रेत्य च ब्रह्मणि लीयते ॥३२॥
इमं स्तोत्रं गृहे सम्यक् कुड्यस्थं लेखयित्वा वि
निक्षिपेत् । नाग्निचौरभयं चैव पापेभ्योरि
भयं न हि ॥३३॥ ज्येष्ठे मासि सिते पक्षे दश
मी बुधसंयुता ॥ स हरेत्त्रिविधं पापं बुधवा
रेण संयुता ॥३४॥ तस्यां दशम्यामेतच्च स्तो
त्रं गंगाजले स्थितैः ॥ यः पठेद्दशकृत्वा
स्तु दरिद्रो वापि चाक्षमः ॥ सोपि तत्फलं
माप्नोति गंगां संपूज्य यत्नतः ॥३५॥ पूर्वोक्ते

न विधानेन यत्फलं संप्रकीर्त्तितः ॥ यथा
गौरी तथा गंगा तस्मात्सौर्यस्तु सज्जने ॥३६
॥ विधियो विहितः सम्यक् सोपि गंगां प्रप्र
ज्ञयेत् ॥ यथा शिवस्तथा विष्णुर्यथा विष्णु
स्तथा ह्युमा ॥ ३७ ॥ उमा यथा तथा गंगा चु
तूर्रूपं न विद्यते ॥ विष्णुरुद्रांतरं यस्तु श्री गं
गौर्योरंतरं यथा ॥ ३८ ॥ गंगागौर्योरंतरं
पश्ययो ब्रूते मूढधीस्तु तः ॥ रौरवादिषु ।
घोरेषु नरकेषु पतत्यधः ॥ ३९ ॥ अदत्ता ५
नामुपादानं हिंसा चैवाविधानतः । प
म

रदारोपसेवा च कायिकं त्रिविधं स्मृतं ॥ ४०॥
पारुष्यमनृतं चैव पैशून्यं चापि सर्वतः ॥ अ
संबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ॥ ४१॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं । वि
तथाभिनिवेशश्च मानसं त्रिविधं स्मृतं ॥ ४२
एतानि दश पापानि हर त्वं मम जाह्नवी ॥
दशपापहरा यस्मात्तस्माद्दशहरा स्मृता
॥ ४३ ॥ एतैर्दशविधैः पापैः कोटिजन्मसमु
द्भवैः ॥ मुच्यते नात्र संदेहो ब्रह्मणो वचनं य
था ॥ ४४ ॥ दशत्रिंशद्भूतान्सर्वान्पितॄनथ

पितामहान्॥ उद्धरेत्येव संसारान्मंत्रेण
नेन पूजितान्॥४५॥ ॐ नमो भगवति दश
पापहरायै श्रीगंगायै नारायण्यै रेवत्यै शि
वायै दक्षायै अमृतायै विश्वायै विश्वमोक्षा
यै नंदिन्यै ते नमो नमः॥४६॥ ज्येष्ठमासि
सिते पक्षे दशम्यां बुधहस्तयोः॥ गरानंदे
व्यतीपाते कन्याचंद्रे वृषे रवौ॥४७॥ दश
योगे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ सि ।४७।
तमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां क ६
रधृतकलशोद्यत्सोत्पलाभीत्यभीष्टां।

॥ ॥ विधिहरिहररूपां सेंदुकोटीरजु
ष्टां कलितसितदुकूलां जाह्नवीं तां न
मामि॥४८॥ आदावादिपितामहस्य
नियमव्यापारपात्रे जलं पश्चात्पन्नगशा
यिनो भगवतः पादोदकं पावनं॥ भूयः
शंभुजटाविभूषणमणिर्जह्नोर्महा
र्षेरियं कन्या कल्मषनाशिनी भगवती
भागीरथी दृश्यते॥४९॥ इति श्रीभवि
ष्योत्तरपुराणे काशीमाहात्म्ये दशपाप ७
हरास्तोत्रं संपूर्णं॥ श्रीरस्तु॥ शुभं भवतु

श्लोक:५० पैसा६